Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.j.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

# ‘विप्रतिषेधे परं कार्यम्’ सूत्रस्य ग्रहणाग्रहणविचारः ।

राज्यगुरु जयेशकुमार आर.

## 'विप्रतिषेधे परं कार्यम्' सूत्रस्य प्रयोजनम्

न केवलं पाणिनेः व्याकरणशास्त्रेऽपि तु समग्रे संसारे तुल्यबलस्थाने विरोधो दृश्यत एव । तुल्यबलविरोधे लोके यथा ज्ञानवृद्धानां परमाचार्याणां विचारं जनाः स्वीकुर्वन्ति तथा व्याकरणे तुल्यबलविरोधे परसूत्रेण कार्यं भवति तेन च पूर्वसूत्रं बाध्यते । एतच्च नियमः सपादसप्ताध्यायीपर्यन्तानां सूत्राणां कृत एव । त्रिपाद्यां खलु पूर्वसूत्रदृष्ट्या परसूत्रं बाध्यते । 'विप्रतिषेधे परं कार्यम्'[i] सूत्रस्य व्याख्या वरदाराजाचार्येण लघुसिद्धान्तकौमुद्यां कृता यथा –

**तुल्यबलविरोधे परं कार्यं स्यात् ।** [ii]

तुल्यबलविरोधे परसूत्रकार्यं भवतीति निर्णयमिदं परिभाषासूत्रं स्थापयति ।

## 'विप्रतिषेधे परं कार्यम्' सूत्रस्य ग्रहणाग्रहणविचारः

पाणिनेः व्याकरणशास्त्रे सर्वत्र यदुपरि कथितः स विप्रतिषेधनियमो न स्वीक्रियते । यदि सर्वत्र नियमोऽयं स्वीक्रियते चेद्व्याकरणशास्त्रस्य दोषरहितत्वं न भवति । व्याकरणशास्त्रस्य प्रधानो विचारः लक्ष्यसिद्धिः । येन नियमेन पाणिन्यादित्रिमुनिविचारानुसारं शब्दशास्त्रस्य लक्ष्यं प्राप्नुयात् तस्यैव स्वीकारः स्यात् पाणिनिव्याकरणे । लक्ष्यसिद्ध्यै केषुचन स्थानेषु 'विप्रतिषेधे परं कार्यम्' इत्यस्य सूत्रस्य बाधोऽपि भवति । यथा नागेशभट्टस्य परिभाषेन्दुशेखरे परिभाषावचनं प्राप्यते यथा –

**पूर्वपरनित्यान्तरङ्गापवादानामुत्तरोत्तरं बलीयः ।**[iii]

पूर्वस्मात् परसूत्रस्य कार्यं बलवद्भवति । किन्तु परादपि नित्यं, नित्यादन्तरङ्गम् , अन्तरङ्गादपवादकार्यञ्च बलवद्भवति । परादपि नित्यादीनि कार्याणि बलयुक्तानि भवन्तीत्यनेन सिद्ध्यति यद्व्याकरणे सर्वत्र न 'विप्रतिषेधे परं कार्यम्' इति सूत्रमेव प्रधानम् । तथापि पूर्वमेव शेखरे नागेशेन लिखितं यत् –

**प्राचीनवैयाकरणतन्त्रे वाचनिकान्यत्र पाणिनीयतन्त्रे ज्ञापकन्यायसिद्धानि भाष्यवार्ति-**

**कयोरुपनिबद्धानि यानि परिभाषारूपाणि तानि व्याख्यायन्ते ।**[iv]

अनेन कथनेन सिद्ध्यति यदनेन नियमेन 'विप्रतिषेध.' सूत्रं बाध्यते तथाऽपि पाणिनेः विचारानुसारमेवायं नियमः, कात्यायनपतञ्जल्योः पाणिनिमनुगमनत्वात् । त्रिमुनिव्याकरणेऽप्युत्तरोत्तरं मुनीनां प्रामाण्यमिति कथनेऽपि पाणिनेरकथनमेव कात्यायनपतञ्जल्योः कथनरूपं कर्तव्यमेवेति वैयाकरणाः स्वीकुर्वन्ति तेन च पाणिनेरष्टाध्यायां दोषदृष्टिः निवार्यते । स्वयमेव पतञ्जलिः भाष्ये लिखति यत् –

**यच्छब्द आह तदस्माकं प्रमाणम् ।**[v]

अनेन स्पष्टीभवति यत् – विप्रतिषेधसूत्रस्य बाधविचारोऽपि स्वयमेव पाणिनेः । यथा गुरोः गूढवचनैः शिष्याणां ज्ञानं वर्धते तथा व्याकरणशास्त्रे पाणिनेः गूढवचनैः वैयाकरणानां ज्ञानं वर्धते इति पाणिनेरेव विचारः व्याकरणनिर्माणकाले तस्योदाहरणमेव 'विप्रतिषेधे परं कार्यम्' इति सूत्रम् ।

उपरि यथा प्रतिपादितं यत् – परान्नित्यं , नित्यादन्तरङ्गम् , अन्तरङ्गादपवादकार्यं च बलवद्भवति तेषामुदाहरणानि प्राप्यन्ते यथा –

वृक्ष+भ्यस् इत्यत्र 'सुपि च'[vi] इत्यनेन दीर्घकार्यं 'बहुवचने झल्येत्'[vii] इत्यनेनैत्वं च प्राप्ते तत्र बहुवचनसूत्रस्य परत्वादेत्वमेव । तेन पूर्वस्मात् परं बलवदिति सिद्ध्यति ।

तुद्+लट् इत्यत्र 'तुदादिभ्यः शः'[viii] इत्यनेन शप्रत्ययस्य 'पुगन्तलघूपधस्य च'[ix] इत्यनेन लघूपधगुणस्य च प्राप्त्यवसरे शप्रत्ययस्य नित्यत्वात् ग्रहणम् । तेन परादपि नित्यं बलवदिति सिद्ध्यतिग्रामणी+ङे इत्यत्र 'ह्रस्वो नपुंसके प्रातिपदिकस्य'[x] इत्यनेन णीत्यस्य ह्रस्वं 'इकोऽचि विभक्तौ'[xi] इत्यनेन नुमागमश्च प्राप्यते । अत्राल्पापेक्षत्वमन्तरङ्गमिति नियमानुसारं नित्यकार्यादप्यन्तरङ्गं ह्रस्वकार्यं प्राग्भवति । तेन च सिद्ध्यति यन्नित्यादप्यन्तरङ्गं बलवद्भवतीति ।

Vidhyayana - ISSN 2454-8596
An International Multidisciplinary Peer-Reviewed E-Journal
www.j.vidhyayanaejournal.org
Indexed in: ROAD & Google Scholar

श्री + ईशः इत्यत्र 'इको यणचि'[xii] इत्यनेन सूत्रेण यण्विधानं 'अकः सवर्णे दीर्घः'[xiii] इत्यनेन सवर्णदीर्घस्य कार्यं सहैव प्राप्यते । तत्र 'निरवकाशो विधिरपवाद' इति नियमानुसारं दीर्घकार्यरूपोऽपवादः प्राग्विधीयते ।

'विप्रतिषेधे परं कार्यम् ' इत्यस्य बाधेन सह ज्ञायते यद्व्याकरणशास्त्रेऽपवादशास्त्रं सर्वतो बलवत् । न पाणिनेः विचारानुसारं परकार्यम् । तथाऽपि विचारोऽयं पाणिनेरेव तत्र च भाष्यकारकथनं प्रमाणं यथा –

**प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचाववकाशे प्राङ्मुख उपविश्य महता यत्नेन सूत्रं प्रणयति स्म । तत्राशक्यं वर्णेनाऽप्यनर्थकेन भवितुं किं पुनरियता सूत्रेण ।**[xiv]

अनेन व्याकरणशास्त्रस्य पाणिनेः 'विप्रतिषेधे परं कार्यम्' सूत्रमिदं सर्वत्र ग्राह्यं न भवति । केषुचन स्थानेषु यत्र व्याकरणशास्त्रस्य हितं निहितं स्यात्तत्रास्य सूत्रस्य त्यागः श्रेष्ठः ।

**सन्दर्भः**

[i] **अष्टाध्यायी -1.4.2**
[ii] **लघुसिद्धान्तकौमुदी – सू.113**
[iii] **परिभाषेन्दुशेखरः- 38- नागेशभट्टः**
[iv] **परिभाषेन्दुशेखरः – 1 – नागेशभट्टः**
[v] **महाभाष्यम् – 2.1.1**
[vi] **अष्टाध्यायी – 7.3.102**
[vii] **अष्टाध्यायी – 7.3.103**
[viii] **अष्टाध्यायी – 3.1.77**
[ix] **अष्टाध्यायी – 7.3.86**
[x] **अष्टाध्यायी -1.2.47**
[xi] **अष्टाध्यायी -7.1.73**
[xii] **अष्टाध्यायी – 6.1.77**
[xiii] **अष्टाध्यायी-6.1.101**
[xiv] **महाभाष्यम् -1.1.1**